Hiralal Mazumdar Memorial College for Women, Dakshineswar, Kolkata-700035 LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2021-22

## SANACOR05T-SANSKRIT (CC5)

## CLASSICAL SANSKRIT LITERATURE (DRAMA)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) भासप्रणीते स्वप्नवासवदत्तनाटके स्वप्नदृश्यस्य तात्पर्यं व्याख्यायताम्।

(ख) स्वप्नवासवदत्तनाटकानुरोधेन राज्ञ उदयनस्य चरित्रं विश्लेषणीयम्।

2. अधोनिर्दिष्टयोरन्यतरस्य संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×1 = 5

(क) कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥

(ख) इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः॥

3. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) स्वप्नवासवदत्तनाटके कति अङ्काः विद्यन्ते ? तत्र ब्रह्मचारिवृत्तान्तः कुत्र अङ्के विद्यते ?

(ख) राज्ञ उदयनस्य मन्त्रिणौ कौ आस्ताम् ?

(ग) "परस्परगता लोके दृश्यते रूपतुल्यता"— इत्यत्र कः कस्य रूपतुल्यतां विवक्षति ?

(घ) "प्रद्वेषो बहुमानो वा संकल्पादुपजायते"— अत्र रेखाङ्कितपदे सकारणं विभक्तिनिर्देशः करणीयः।

(ङ) कः महासेनः ? केन कारणेन स तथा उच्यते ?

(च) को नाम न्यासः ? स्वप्नवासवदत्तनाटके न्यासत्वेन कस्य चरित्रस्य उल्लेखः अस्ति ?

(छ) वासवदत्ता-पद्मावत्योः चारित्रिकवैशिष्ट्यगतः द्विविधः भेदः लेख्यः।

## SECTION-B

4. यथाभिमतमेकस्य प्रश्नस्य उत्तरं संस्कृतेन देवनागरीलिप्या च देयम्। 10×1 = 10

(क) अभिज्ञानशकुन्तलनाटके दुर्वाससः अभिशापवृत्तान्तस्य तात्पर्यं विवृणुत।

(ख) अनसूयाप्रियंवदयोः चरित्रयोः तुलना विधीयताम्।

(ग) प्रथमाङ्कमनुसृत्य हस्तिवृत्तान्तः सतात्पर्यमालोच्यताम्।

5. यथेच्छं त्रयाणां श्लोकानां संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×3 = 15

(क) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ख) क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः॥

(ग) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(घ) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तस्तदन्यतेजोऽभिभवाद्वमन्ति॥

(ङ) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

अथवा

अधोलिखितेषु यथेच्छं त्रयाणां टिप्पणी संस्कृतेन देवनागरीलिप्या च लेख्या। 5×3 = 15

(क) नान्दी

(ख) गान्धर्वविधिः

(ग) अभिज्ञानम्

(घ) विदूषकः

(ङ) हंसपदिका

(च) शार्ङ्गरवः

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——